# संस्कृतवार्ताः

दिनाङ्क :-16.02.2025 प्रात: - 06:55

इयम् आकाशवाणी

सम्प्रति वार्ताः श्रूयन्ताम्

प्रधानमन्त्री/भारत-टेक्स-कार्यक्रमः

प्रधानमन्त्री नरेन्द्रमोदी अद्य नवदिल्ल्याः भारतमण्डपे पञ्चविंशत्यधिक-द्विसहस्रतम-वर्षीये भारत-टेक्स-कार्यक्रमे सहभागं करिष्यति। अवसरेऽस्मिन् सः एकां सभां सम्बोधयिष्यति। भारत-टेक्स इत्येषः विशिष्ट-वैश्विककार्यक्रमः अस्य वर्षस्य फरवरीमासस्य चतुर्दश-दिनाङ्कात् आरभ्य सप्तदश-दिनाङ्कं यावत् भारतमण्डपे प्रचलिष्यति।

-------------------------------------------

प्रधानमन्त्री/शिखरसम्मेलनम्

प्रधानमन्त्री नरेन्द्र-मोदी अवदत् यत् भारतं न केवलं वैश्विक-भविष्यम् अभिलक्ष्य चर्चाकेन्द्रे अस्ति, अपि तु एतासां चर्चाणां नेतृत्वम् अपि करोति। गतदिने दिल्ल्याम् एकेन संचार-पटलेन आयोजिते शिखर-सम्मेलने श्रीमोदी अवदत् यत् भारतेन साम्प्रतं वैश्विकस्तरे तत्स्थानं प्राप्तं यद् हि पूर्वं न कदाचित् अधिगतम्। तेन सबलम् उक्तं यत् भारतं चतुर्दशाधिक-द्विसहस्र-तमाब्दात् एव विकासपथे अग्रेसरति।

-------------------------------------------

रेलस्थानकम्/ससंभ्रम-पलायनम्

दिल्ल्यां गतवासरे नवदिल्ली-रेल-स्थानके दुरापन्ने ससंभ्रम-पलायने दशाधिकाः जनाः व्रणिताः। अधिकारिणाम् अनुसारि अत्र प्रायः कतिपयजनाः मृत्युम् अपि उपगताः। केन्द्रीय-रेलमन्त्री अश्विनी-वैष्णवः असूचयत् यत् व्रणिताः उपचारार्थं चिकित्सालये प्रवेशिताः। सम्प्रति स्थितिः नियन्त्रितास्ति। तेन उक्तं यत् घटनायाः उच्च-स्तरीय-समीक्षणार्थम् आदिष्टम्। श्रीवैष्णवः उक्तवान् यत् यात्रिभ्यः चत्वारि विशिष्टानि महाकुम्भ-रेलयानानि सपदि प्रचालितानि। घटनामेताम् अभिलक्ष्य प्रधानमन्त्रिणा नरेन्द्र-मोदिना गभीरः शोकः प्रकाशितः। तेन उक्तं यत् मृतकपरिवारेभ्यः तदीया संवेदना अस्ति। व्रणितानां शीघ्र-स्वास्थ्यलाभाय अपि तेन प्रार्थना कृता।

-------------------------------------------

**प्रधानमन्त्री/काशीतमिलसङ्गमः**

प्रधानमन्त्री नरेन्द्र-मोदी प्रवर्तमानवर्षीये काशी-तमिल-संगमे सहभागार्थं जनाः अध्यर्थिताः। गतदिने एकस्मिन् सामाजिक-संचार-पटले तेन उक्तं यत् एषः कार्यक्रमः 'एकं भारतं श्रेष्ठं भारतम्' इत्यस्याः उदात्तभावनायाः अपि पोषकं वर्तते।

तत्रान्तरे, तमिलनाडु-काशीनगरयोः मध्ये सांस्कृतिकं बौद्धिकं च सम्बन्धं प्रवर्धमानस्य काशी-तमिल-सङ्गमस्य तृतीयं संस्करणं ह्यः उत्तरप्रदेशस्य वाराणस्याम् आरभत। केन्द्रीयमन्त्री धर्मेन्द्र-प्रधानः, डॉ.एल्.मुरुगनः मुख्यमन्त्री योगी आदित्यनाथः च कार्यक्रमस्यास्य उद्घाटनम् अकुर्वन्।

-------------------------------------------

**संस्कृत-साप्ताहिकी**

प्रियाः श्रोतारः, संस्कृत-जगता सम्बद्धैः विभिन्नैः क्रिया-कलापैः संवलितस्य संस्कृत-साप्ताहिकीति-विशिष्ट-कार्यक्रमस्य प्रसारणम् आकाशवाण्याः एफ्.एम्.गोल्ड्-प्रवाहिकातः अद्य मध्याह्ने सार्धैक-वादनतः भविष्यति। भवन्तः सर्वे यथाकालं श्रोतुं प्रभवन्ति।

-------------------------------------------

**क्रिकेट्**

पञ्चविंशत्यधिक-द्विसहस्र-तमाब्दीयायां वुमन्स्-प्रीमियर-लीग्-क्रिकेट्-स्पर्धा-मालिकायां गतवासरे वडोदरायाः कोटाम्बी-क्रीडाङ्गणे आयोजिते द्वन्द्वे डेल्ही-कैपिटल्स्-दलेन मुम्बई-इंडियन्स्-दलं क्रीडक-द्वयेन पराजितम्। अद्य समानस्थले एव गुजरातटाईटन्स्-दलं यूपी-वारियर्स-वुमन्-दलेन सह स्पर्धिष्यते।

।।इति वार्ताः।।